SADVIDYA FOUNDATION

# Yoga Sutra - Level 1 - Chapter 4

Int चतुर्थः पादः।
caturthaḥ pādaḥ।

कैवल्य-पादः।
kaivalya-pādaḥ।

1 जन्म-ओषधि-मन्त्र-तपः समाधिजाः सिद्धयः।
janma-oṣadhi-mantra-tapaḥ samādhijāḥ siddhayaḥ।

2 जाति-अन्तर-परिणामः प्रकृति-आपूरात्।
jāti-antara-pariṇāmaḥ prakṛti-āpūrāt।

3 निमित्तम् अप्रयोजकं प्रकृतीनां वरण-भेदः तु ततः क्षेत्रिकवत्।
nimittam aprayojakaṃ prakṛtīnāṃ varaṇa-bhedaḥ tu tataḥ kṣetrikavat।

4 निर्माण-चित्त-अन्यस्मिता-मात्रात्।
nirmāṇa-citta-anyasmitā-mātrāt।

5 प्रवृत्ति-भेदे प्रयोजकं चित्तम् एकम् अनेकेषाम्।
pravṛtti-bhede prayojakaṃ cittam ekam anekeṣām।

6 तत्र ध्यानजम् अनाशयम्।
tatra dhyānajam anāśayam।

7 कर्म-अशुक्ल-अकृष्णं योगिनः त्रिविधम् इतरेषाम्।
karma-aśukla-akṛṣṇaṃ yoginaḥ trividham itareṣām।

8 ततः तत्-विपाक-अनुगुणानाम् एव अभिव्यक्तिः वासनानाम्।
tataḥ tat-vipāka-anuguṇānām eva abhivyaktiḥ vāsanānām।

9 जाति-देश-काल-व्यवहितानाम् अपि आनन्तर्यं स्मृति-संस्कारयोः एक-रूपत्वात्।
jāti-deśa-kāla-vyavahitānām api ānantaryaṃ smṛti-saṃskārayoḥ eka-rūpatvāt।

10 तासाम् अनादित्वं च आशिषः नित्यत्वात्।
tāsām anāditvaṃ ca āśiṣaḥ nityatvāt।

11 हेतु-फल-आश्रय-आलम्बनैः सङ्गृहीतत्वात् एषाम् अभावे तत्-अभावः।
hetu-phala-āśraya-ālambanaiḥ saṅgṛhītatvāt eṣām abhāve tat-abhāvaḥ।

12 अतीत-अनागतं स्वरूपतः अस्ति-अध्व-भेदात् धर्माणाम्।
atīta-anāgataṃ svarūpataḥ asti-adhva-bhedāt dharmāṇām।

13 ते व्यक्त-सूक्ष्माः गुण-आत्मानः।
te vyakta-sūkṣmāḥ guṇa-ātmānaḥ।

14 परिणाम-एकत्वात् वस्तु-तत्त्वम्।
pariṇāma-ekatvāt vastu-tattvam।

15 वस्तु-साम्ये चित्त-भेदात् तयोः विभक्तः पन्थाः।
vastu-sāmye citta-bhedāt tayoḥ vibhaktaḥ panthāḥ।

16 न च एक-चित्त-तन्त्रं वस्तु तत् अप्रमाणकं तदा किं स्यात्।

na ca eka-citta-tantraṃ vastu tat apramāṇakaṃ tadā kiṃ syāt।

17 तत् उपराग-अपेक्षित्वात् चित्तस्य वस्तु ज्ञात-अज्ञातम्।

tat uparāga-apekṣitvāt cittasya vastu jñāta-ajñātam।

18 सदा ज्ञाताः चित्त-वृत्तयः तत्-प्रभोः पुरुषस्य अपरिणामित्वात्।

sadā jñātāḥ citta-vṛttayaḥ tat-prabhoḥ puruṣasya apariṇāmitvāt।

19 न तत्-स्व-आभासं दृश्यत्वात्।

na tat-sva-ābhāsaṃ dṛśyatvāt।

20 एक-समये च उभय-अनवधारणम्।

eka-samaye ca ubhaya-anavadhāraṇam।

21 चित्त-अन्तर-दृश्ये बुद्धि-बुद्धेः अतिप्रसङ्गः स्मृति-सङ्करः च।

citta-antara-dṛśye buddhi-buddheḥ atiprasaṅgaḥ smṛti-saṅkaraḥ ca।

22 चितेः अप्रतिसङ्क्रमायाः तत्-आकार-आपत्तौ स्व-बुद्धि-संवेदनम्।

citeḥ apratisaṅkramāyāḥ tat-ākāra-āpattau sva-buddhi-saṃvedanam।

23 रष्टृ-दृश्य-उपरक्तं चित्तं सर्व-अर्थम्।

draṣṭṛ-dṛśya-uparaktaṃ cittaṃ sarva-artham।

24 तत् असङ्ख्येय-वासनाभिः चित्रम् अपि पर-अर्थं संहति-अकारित्वात्।
tat asaṅkhyeya-vāsanābhiḥ citram api para-arthaṃ saṃhati-akāritvāt।

25 विशेष-दर्शिनः आत्म-भाव-भावना-विनिवृत्तिः।
viśeṣa-darśinaḥ ātma-bhāva-bhāvanā-vinivṛttiḥ।

26 तदा विवेक-निम्नं कैवल्य-प्राक्-भारं चित्तम्।
tadā viveka-nimnaṃ kaivalya-prāk-bhāraṃ cittam।

27 तत्-छिद्रेषु प्रत्यय-अन्तराणि संस्कारेभ्यः।
tat-chidreṣu pratyaya-antarāṇi saṃskārebhyaḥ।

28 हानम् एषां क्लेशवत् उक्तम्।
hānam eṣāṃ kleśavat uktam।

29 रसङ्ख्याने अपि अकुसीदस्य सर्वथा विवेक-ख्यातेः धर्म-मेघः समाधिः।
prasaṅkhyāne api akusīdasya sarvathā viveka-khyāteḥ dharma-meghaḥ samādhiḥ।

30 ततः क्लेश-कर्म-निवृत्तिः।
tataḥ kleśa-karma-nivṛttiḥ।

31 तदा सर्व-आवरणम् अलापेतस्य ज्ञानस्य आनन्त्यात् ज्ञेयम् अल्पम्।
tadā sarva-āvaraṇam alāpetasya jñānasya aānantyāt jñeyam alpam।

32 ततः कृत-अर्थानां परिणाम-क्रम-समाप्तिः गुणानाम्।
tataḥ kṛta-arthānāṃ pariṇāma-krama-samāptiḥ guṇānām।

33 क्षण-प्रतियोगी परिणाम-अपर-अन्त-निर्ग्राह्यः क्रमः।
kṣaṇa-pratiyogī pariṇāma-apara-anta-nirgrāhyaḥ kramaḥ।

34 पुरुष-अर्थ-शून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूप-प्रतिष्ठा वा चिति-शक्तिः इति।
puruṣa-artha-śūnyānāṃ guṇānāṃ pratiprasavaḥ kaivalyaṃ svarūpa-pratiṣṭhā vā citi-śaktiḥ iti।

Closing

इति पतञ्जलि-विरचिते योग-सूत्रे चतुर्थः कैवल्य-पादः।
iti patañjali-viracite yoga-sūtre caturthaḥ kaivalya-pādaḥ।

इति श्री पातञ्जल-योग-सूत्राणि।
iti śrī pātañjala-yoga-sūtrāṇi।